शास्त्री 12क्लास साहित्य

# अभिज्ञानशाकुन्तलम्

## सप्तमोऽङ्कः

श्लो०- अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥

सन्दर्भ- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य काव्यस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति । अस्मिन् श्लोके राजा दुष्यन्तः भाविच्यं बालकं विलोक्य नृपतिर्दुष्यन्तः सकौतुकमाश्चर्य सहितं च वचोऽवोचत् राजर्षिर्दुष्यन्तः स्वमनसि विचारयति- कोऽयं बालकसत्वो बालः यः किल क्रीडया मनोविनोदमात्रेव कर्तुं सिंहीस्तनं पिबन्तं केसरीकिशोरकं बलात्कारेण कर्षति ।

व्याख्या- प्रक्रीडितुं = क्रीडा कर्तुं, मनोविनोदार्थम्, आमर्दक्लिष्टकेसरम् = आमर्देन = स्वकृताकर्षणवेगेन, मातुर्जिह्वया लेहनेन, कचसोहननेन वा क्लिष्टाः = विकीर्णा केशराः = गलबालाः सटाः यस्य सः तं आमर्दक्लिष्टकेसरम् अर्धपीतस्तनं = अर्धं = असमग्र अपूर्वं यथा स्यात्तथा पीतः = पानकृतः स्तनौ येन सः तम अर्धपीतस्तनम्, किञ्चिदपीतस्तन्यम् सिंहशिशुम् = केसरीकिशोरम् बलात्कारेण प्रसह्य मातुः = जनन्याः सिंह्याः सकाशात् सिंहीकोपमगणयित्वा कर्षति = अपनयति । अत्रोदात्तः स्वभावोक्तिश्चालङ्कारौ अनुष्टुप छन्दश्च ।

Renu Devi
06/10/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री-IIखण्ड　　साहित्य

रघुवंशमहाकाव्यम्

त्रयोदशः सर्गः

प्र० (1)- तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ।
ऊर्ध्वाङ्कुरप्रोतमुखं कथञ्चित्क्लेशादपक्रामति शङ्खयूथम् ॥

उत्तरम् - प्रसंगः- प्रस्तुतोऽयं श्लोक महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यात् त्रयोदशसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके श्रीरामः सीतांप्रति कथयति - प्रिये रक्त-वर्णतया त्वदधरसदृशेषु प्रवालेषु तरङ्गवेगात् सहसा पातितः विद्रुमाङ्कुरैः स्यूतवदनः शङ्खनिकरः विद्रुमाणामङ्कुरेषु दृढ संलग्नत्वात् शङ्खानां ततोऽपसरणे महान् क्लेशो भवतीति कौतुकं पश्येति भावः।

व्याख्या:- तव = ते। अधरस्पर्धिषु = औष्ठसाम्यार्थिषु, अधरसदृशेषु। विद्रुमेषु = प्रवालेषु। सहसा = द्रुततरम्। ऊर्मिवेगात् = तरङ्गजवात्। पर्यस्तम् = प्रक्षिप्तम्। ऊर्ध्वाङ्कुरप्रोतमुखम् = विद्रुमप्ररोहस्यूतमुखम्। एतत् = इदम्। शङ्खयूथम् = कम्बुवृन्दम्। कथञ्चित् = केनापि प्रकारेण। क्लेशात् = कृच्छ्रात्। अपक्रामति = गच्छति। अङ्कुरे दृढसंलग्नत्वात् शङ्खानां ततोऽपसरणे महान् क्लेशो भवतीत्यर्थः।

Renu Devi
06/20/20

राधाउमाकांत सं० महाविद्यालय सुखसेना,
पूर्णिया।

प्रश्न – तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिन्हानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥

उत्तरम् – प्रसंगः – प्रस्तुतोऽयं श्लोक महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके नन्दिनी सुदक्षिणां प्रति कथयति – निजमुखविकासादिना कथितकल्पमपि नन्दिन्या वरानुग्रहं राजा दिलीपः प्रथमं गुरवे कथयित्वा पश्चात् प्रियायै सुदक्षिणायै सविस्तरं शशंस । अर्थात् स्वप्रशंसायाः स्वयं वक्तुमनुचितं मत्वा गुरवे केवलं वरदान मात्रं निवेद्य, सुदक्षिणायै हर्षानुमिता भीपत्लाभायै सिंहवृतान्तमारभ्य वरदानपर्यन्तं सर्वं विस्तरतो वर्णयामास ।

व्याख्याः – प्रसन्नेन्दुमुखः = प्रसन्नमुखचन्द्रः, नृपाणां = राज्ञाम्, गुरुः = श्रेष्ठः, अधिपः = राजा दिलीपः, प्रहर्षचिन्हानुमितं = अधिकानन्दमुखविकासादितर्कितम्, तस्याः = नन्दिन्याः गोः, प्रसादं = वरम्, पुनरुक्तया = द्विरुक्तया, आम्रेडितया वा, इव = यथा, वाचा = वाण्या, गुरवे = वसिष्ठाय, निवेद्य = सविनयं विज्ञाप्य, प्रियायै = सुदक्षिणायै, शशंस = सविस्तरम् – भिदध्यै ।

Rinku Devi
06/10/20
राधाउमाकांत सं० महाविद्यालय सुखसेना,
पूर्णिया ।

उपशास्त्री - I खण्ड साहित्य - तृतीय - पत्रम्

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

प्र० (1) - स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः। शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके सिंह राजादिलीपं प्रति कथयति - राजन्! अलं लज्जया, मद्विषये कुण्ठितशस्त्रप्रभावो भवान् उपायान्तराभावात् लज्जां संकोचं वा विहाय वसिष्ठाश्रमं प्रति याहि। गौरक्षणे कृतप्रयत्नत्वया गुरौ भक्तिः प्रकटिता। रक्षणार्हमपि वस्तु शस्त्रसाध्यं न चेत्तर्हि शस्त्रधारिणां वीरता कीर्तिं वा न दूषयति। इयं हि नन्दिनी भवताशस्त्रबलेन मत्सकाशात् रक्षितुं न शक्या। अशक्ये कार्ये अप्रवृत्तिर्नैव दोषाय कल्पते इति भावः।

व्याख्याः - सः = लोकप्रसिद्धः, त्वं = गत्यन्तररहितो भवान्, लज्जां = व्रीडाम्, विहाय = परित्यज्य, निवर्तस्व = पराङ्मुखो भूत्वा वसिष्ठाश्रमं परावर्तस्व, भवान् = श्रीमान्, गुरोः = वसिष्ठस्य विषये, दर्शितशिष्य भक्तिः = प्रदर्शितशिष्यश्रद्धा अस्ति। यत् रक्ष्यं = रक्षणीयं वस्तु, शस्त्रेण = आयुधेन, अशक्यरक्ष्यं = असाध्यत्राणम्, तत् = रक्षितुमशक्यं वस्तु, शस्त्रभृतां = अस्त्रधारिणाम्, यशः = कीर्तिम्, न क्षिणोति = नैव ह्रासयति।

Renu Devi
06/10/20
राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया।